No. १२८६

Title विधि विचार:

Author ×

Extent ५४ Age ×

Subject न्याय वैशेषिक°

विधी विचार:

विधिवाद:

१२८६

विधिवाद १६००

ॐ गणेशाय नमः॥ ओदनकामः पचेत् स्वर्गकामो यजेतेत्यादिविधिवाक्यं पाकयागादौ प्रवर्तकं तस्य
च तत्प्रवर्तकत्वं न साक्षात् अश्रुतस्याज्ञानात् ततोऽप्रवृत्तेः किन्तु स्वजन्यज्ञानद्वारेति तस्य प्रवर्तकज्ञानजनक
त्वोपपत्तये प्रवर्तकज्ञानविषय एव लिङादेः शक्तिरिति सर्वैरेवाभ्युपगम्यते॥ प्रवर्तकञ्ज्ञानं च कृते
चिकीर्षाद्वारा कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वानां ज्ञानं॥ इष्टसाधनत्वबलव
लवदनिष्टाननुबन्धित्वयोर्ज्ञातेऽपि कृत्यसाध्यतया ज्ञाते चिकीर्षाप्रवृत्त्योरनुदयात् कृतिसाध्य
ताज्ञानस्य तद्धेतुता स्वीक्रियते॥ चिकीर्षा च पाकेन कृत्या साधयामीत्याकारिका कृतिसाध्यत्वप्रका
रिकेच्छा तस्याश्च पाकत्वाद्यवच्छिन्नविशेष्यककृतिसाध्यत्वप्रकारिकेच्छात्वेन साक्षादेव तादृश
कृतिसाध्यताप्रकारकज्ञानत्वावच्छिन्नजन्यता॥ अनुमानधर्मितावच्छेदकवत्कृतिसाध्यता
ज्ञानेन चिकीर्षायाम् अनुमानतास्त्वनुमानधर्मितावच्छेदकान्तर्भावः॥ प्रत्यासत्तिश्च कार्यकारणयोः
सामानाधिकरण्यमिति नैकपुरुषीयज्ञानादन्यपुरुषीयचिकीर्षोत्पत्तिः॥ अपि च तद्धर्मावच्छिन्न
विशेष्यताकेष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां हेतुतायाः क्लृप्तत्वात् कृतिसाध्यपाकत्वादि

धर्मितावच्छेदककेष्टसाधनताज्ञानादेव तत्प्रकारकचिकीर्षासंभवेन किं कृतिसाध्यताज्ञानस्य स्वातंत्र्येण हेतु-
तया॥ यत्र तु शुद्धपाकत्वादिकं धर्मितावच्छेदकीकृत्येष्टसाधनत्वं कृतिसाध्यत्वं चावगतं तत्र कृतिसा-
ध्यत्वप्रकारकपाकादिगोचरेच्छा न जायत एव॥ शुद्धघटत्वावच्छिन्नविशेष्यकेष्टसाधनत्वग्रह-
दशायां घटो नील इत्यादिज्ञानसत्त्वेपि नीलो घटो भवत्वित्याकारकेच्छावत्॥ यत्तु पाकत्वावच्छि-
न्नधर्मिकेष्टसाधनताज्ञानस्यैव पाकत्वादिप्रकारकेच्छां प्रति हेतुता किं तु कृतिसाध्यपाकत्वा-
वच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य कृतिसाध्यपाकत्वादिप्रकारकेच्छां प्रति हेतुतापि तदनुगमकोपि २६
कृतिसाध्यः पाक इष्टसाधनमित्यादिज्ञानदशायां पाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानता-
दृशकृतिसाध्यताज्ञानघटितसामग्रीबलादेव कृतिसाध्यपाकत्वादिप्रकारकेच्छासंभवात् कृतिसा-
ध्यत्वेन पाकादिगोचरेच्छां प्रति पाकः कृतिसाध्य इत्यादिज्ञानस्यैव हेतुताकल्पनमुचितं॥ कृति-
साध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानहेतुतापेक्षया लाघवात्॥ न च तादृशेष्टसाध-
नताज्ञानस्यापि स्वतन्त्रहेतुतायाः कल्प्यमानतया न लाघवावकाश इति वाच्यं॥ चिकीर्षाना-

विधिवा०
२
2

त्मकपाकत्वादिप्रकारकेच्छानुरोधेन कृतमस्यापाकत्वादिप्रकारकेच्छं प्रति तदवच्छिन्नविशेष्यके
ष्टसाधनताज्ञानहेतुत्वेनैवोपपत्तेश्चिकीर्षायामिष्टसाधनताज्ञानस्य हेतुत्वं नेत्यः
कल्पनात्। न च तत्तद्धर्मप्रकारकेच्छां प्रति तत्तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनताज्ञानत्वे
नात्मनिष्ठमतासत्ताहेतुत्वोपगमे प्रकारभेदेनानन्तकार्यकारणताप्रसंग इति प्रकारतासं
बन्धेनेच्छां प्रति धर्मितावच्छेदकतासंबन्धेनेष्टसाधनताज्ञानस्य हेतुतावाच्या॥ इत्थं च कृतिसा
ध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य धर्मितावच्छेदकतासंबन्धेन कृतिसाध्यत्व
विशिष्टपाकत्वत्वमत्वेन तादृशविशिष्टधर्मप्रकारकेच्छायां तादृशेच्छं प्रति हेतुत्वेनैवोपपत्तेरि
ति किं पाकत्वाद्यवच्छिन्नविशेष्यककृतिसाध्यत्वप्रकारकज्ञानस्य स्वतन्त्रहेतुतयेति वा
च्यं। यत्र कृतिसाध्यत्वे पाकत्वं च स्वरूपमेव धर्मितावच्छेदकं कृत्वेष्टसाधनताज्ञानं तत्र
कृतिसाध्यः पाको भवत्वित्याकारिकेच्छावारणाय पाकत्वाद्यवच्छिन्नविशेष्यतानिरूपितकृ
तिसाध्यत्वादिप्रकारताकेच्छां प्रति कृतिसाध्यत्वादिप्रकारतानिरूपितपाकत्वाद्यवच्छिन्न

२

विशेष्यतानिरूपितेष्टसाधनत्वप्रकारताशालिज्ञानत्वेन कृतिसाध्यत्वप्रकारतानिरूपित
विशेष्यतावच्छेदकतासंबंधेनेच्छां प्रति तत्प्रकारतानिरूपितविशेष्यतावच्छेदकत्वाभिमते
ष्टसाधनत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन तज्ज्ञानत्वेनैव वा हेतु
तायामवतावाच्यतयातस्याश्चोभयवाप्यसिद्धतयातदपेक्षयालाघवेन कृतिसाध्यत्वेन
पाकत्वाद्यवच्छिन्नविशेष्यकेच्छां प्रति पाकत्वाद्यवच्छिन्नविशेष्यककृतिसाध्यताज्ञानत्वे
न कृतिसाध्यत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेनेच्छां प्रति तादृशसं
बंधेन तज्ज्ञानत्वेनैव वा हेतुतायाः कल्पयितुमुचितत्वात् ॥ चिकीर्षासामग्री यत्र प्रतिबं
धिका तत्र पाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानविशिष्टतादृशकृतिसाध्यताज्ञा
नत्वेन प्रतिबंधकताकल्पनापेक्षया कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनता
ज्ञानत्वेन प्रतिबंधकत्वकल्पने लाघवाद्धर्मितावच्छेदकेष्टसाधनताज्ञानस्य
चिकीर्षाहेतुत्वकल्पनमेवोचितमित्यपि न साधु ॥ यत्र चिकीर्षासामग्री प्रतिबंधिका त

विधि. २
3

ञ्चेतदनात्मकेच्छासामग्र्यामपि संभवेन तत्तस्या एव प्रतिबंधकत्वेनोपपत्तौ कृतिसाध्यता
ज्ञानस्य सामग्रीप्रतिबंधकतायां कोप्यानिवेशादिति ॥ तदसत् ॥ यथा शुद्धघटत्वाद्यव
च्छिन्नधर्मिकासिद्धत्वज्ञानदशायां नीलघटत्वादिनेष्टसाधनताज्ञानात्तादृशधर्मप्रका
रिकेच्छा जायते तथा शुद्धपाकत्वादिना सिद्धत्वग्रहदशायां कृतिसाध्यपाकत्वादिरूपेणे
ष्टसाधनताज्ञानात्तादृशरूपेणेच्छा भवतीति सर्वानुभवसिद्धं ॥ एवं च शुद्धपाकत्वाद्य
वच्छिन्नविशेष्यकेष्टसाधनताज्ञानादपि तादृशकृतिसाध्यताज्ञानसहकृतात्कृति
साध्यपाकत्वादिप्रकारकेच्छा यदि जायते तदा शुद्धपाकत्वावच्छिन्नधर्मिकासिद्धत्वग
हदशायां कृतिसाध्यपाकत्वादिनेष्टसाधनताज्ञानादिव शुद्धपाकत्वेनेष्टसाधनता
ज्ञानादपि कृतिसाध्यताज्ञानसहकृताच्चिकीर्षापत्तिरिति कृतिसाध्यपाकत्वादिरूपे
णेष्टसाधनताग्रहस्यैव तद्धर्मप्रकारकेच्छां प्रति हेतुत्वमंगीकार्यं ॥ न च शुद्धपाकत्वा
द्यवच्छिन्नधर्मिकासिद्धत्वग्रहदशायां कृतिसाध्यत्वज्ञानासहकृतेन शुद्धपाकत्वा २

घवच्छिन्नधर्मिकेष्टसाधनताज्ञाने नैवेच्छा न जन्यते तत्सहकृते न जन्यत एवेति वा
च्यं ॥ अनुभवविरोधात् तत्र फलस्वीकारे तादृशासिद्धत्वज्ञानाभावसहितस्वरूपायतता
वच्छिन्नधर्मिकेष्टसाधनताज्ञानरूपाया इच्छासामग्र्याः प्रतिबंधकतया दर्शित
स्थले ज्ञानोत्पत्तिवारणामंगभकाज्ञाद् तादृशासिद्धत्वज्ञानाभावमनंतर्भाव्य कृतिसाध्य
ताकत्वावच्छिन्नधर्मिकासिद्धत्वज्ञानाभावसहितकृतिसाध्यताज्ञानसहकृतेष्टसा
धनताज्ञानरूपचिकीर्षासामग्र्यास्तान प्रतिबंधकताकल्पने गौरवाच्च ॥ नन्वेवन्न
तेपि स्वरूपायत्तावच्छिन्नधर्मिकासिद्धत्वज्ञानाभावाघटितायाः कृतिसाध्यताकत्वावच्छि
न्नधर्मिकासिद्धत्वज्ञानाभावसहितकृतिसाध्यताकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञा
नरूपचिकीर्षासामग्र्याः प्रतिबंधकत्वस्यावश्यकल्पनीयतया सामग्र्यामिति वाच्यं ॥ एतादृश
सामग्र्याः कारणकूटघटितायाः प्रतिबंधकत्वापेक्षया कारणत्रयघटितायास्तादृश
सामग्र्या विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबंधकताद्वयस्यात् ॥ यत्तु

विधि.

४

५

मत्लिकारेणाभिहितं ॥ न च कृतिसाध्यपाकत्वेनेष्टसाधनता । अपि तु सुहेतुपाकत्वेनैव त
था चेत् कृतिसाध्यपाकत्वेनेष्टसाधनताग्रहे विशेषदर्शिनां न संभवतीति सुखपाकत्व
नेष्टसाधनताज्ञानमेव ताद्दशकृतिसाध्यताज्ञानसहितं तच्चिकीर्षाकारणं संगीकार्यं
पाकं वह्निना साधयामीत्याकारकं वह्न्यादिसाध्यत्वप्रकारकं एवापि सुखपाकत्वावच्छि
न्नधर्मिकेष्टसाधनताज्ञानादेव वह्निसाध्यः पाक इत्यादिज्ञानसहितादुत्पद्यते न तु व
ह्निसाध्यपाकत्वादिनेष्टसाधनताज्ञानादिति तेन रूपेणेष्टसाधनताविरहेपि न क्ष
तिरिति ॥ तदपि न चारु ॥ यतः कृतिसाध्यपाकत्वावच्छिन्नेष्टसाधनत्वग्रहो हेतुरिति
न ह्यमोघेन तादृशरूपेणेष्टसाधनतानवच्छेदकतया तदसंगतेः स्यादपि न तु कृतिसाध्यपा
कत्वावच्छिन्नाविशेष्यताकेष्टसाधनताग्रहो हेतुरिति नाहितदनवच्छेदकस्य तत्त्वाज्ञाने विशे
ष्यतावच्छेदकत्वमपि न संभवति । धर्मितावच्छेदकसामानाधिकरण्येनावगाहि
नोपि स्वधर्मितावच्छेदकज्ञानसंभवात् ॥ अत एव घटत्वादिना जलाहरणादिसाध ४

नतायाव्यभिचारेणासंभवेऽपि जलाहरणादिसाधनताज्ञानाद्दूरत्वादिप्रकारकेच्छाविशेषदर्शी
नामनुभवात् ॥ यदि च धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहीष्टसाधनताज्ञान
स्य हेतुत्वे द्रव्यत्वादेर्जलाहरणादिसाधनतातिप्रसक्तत्वग्रहेऽपि जलाहरणार्थिनो द्रव्य
त्वादिप्रकारकेच्छापत्तिस्तत्र तन्मप्रसिद्धद्रव्यत्वसामानाधिकरण्येन तत्साधनताग्रहसंभवा
दिति चेद्व्यक्तेतदप्रसिद्धधर्मनिष्ठानतिरिक्तवृत्तित्वरूपपर्याप्तसाधनतावच्छेदकत्वग्रहस्य
ष्टप्रकारकेच्छाहेतुः गौरवे कृतिसाध्यपाकत्वादेः स्वरूपसंबन्धरूपावच्छेदकत्वासं
भवेऽपि तादृशावच्छेदकत्वस्मादृतत्वादिति न काचिदनुपपत्तिरिति ॥ मैवं ॥ यत्र कृतिसाध्यपाकत्वे
नेष्टसाधनत्वं न तु कृतिसाध्यत्वं च गृहीतं तेन तु कृतिसाध्यपाकत्वेनेष्टसाधनत्वं गृहीतं त
त्रापि पाकगोचरप्रवृत्तेरनुभवसिद्धतया चिकीर्षायाः पाकत्वावच्छिन्नत्वेन तादृशकृतिसाध्यता
ज्ञानसहितेष्टसाधनताज्ञानस्य चिकीर्षाजनकत्वमवच्छेदकं न वेति नु ॥ स्ववृत्तिसाध्यत
प्रकारकेच्छैव प्रवृत्तिहेतुः स्ववृत्तिसाध्यताज्ञानात्तदुत्तरोत्पत्तेरीयवृत्तिसाध्यताज्ञाना तत्प्रका

विधि. ५
5

रवेष्टासंभवेप्यप्रवृत्तेः॥ एवं फलोपधानात्मकसाधनताप्रकारिकाया एवेच्छायाः प्रवृत्ति
हेतुत्वमुपेयं न तद्योग्यत्वप्रकारिकायास्तस्याः कृतिसंचारशरीरे वैशेषिमेतल्लेशानामप्यस्मा
दादिकृतेः इति तेन स्वकृतियोग्यतया ज्ञाते समंगले॥ एवं च फलोत्पत्तेः प्रागफलोप
धानस्य सत्वेऽनिष्टमप्यासंभवात्तन्निश्चयसाधारणं स्वकृतिफलोपधानज्ञानमेव
कृतिकारणं चिकीर्षाकारणं वाच्यं॥ अत एव कृतिसाध्यताज्ञानाभावकारणतेन
ग्रहकारेण गौरवमाशंकितं॥ कृतिसाध्यताज्ञानस्यान्निश्चयत्वेन हेतुत्वे तत्रैवा
वच्छेदकगौरवान्तरसंगतेः तथा च कृतिसाध्यपाकत्वधर्मितावच्छेदकेष्टसाधनता
ज्ञानस्य नत्वपात्वसंभवः॥ धर्मितावच्छेदकांशे संशयसाधारण्यानुभवविरुद्धतया तादृ
शेष्टसाधनताज्ञानस्य कृतिसाध्यत्वांशे संशयसाधारण्ययोगादित्याशुद्ध्यानुपाकत्वावच्छि
न्नधर्मिकेष्टसाधनताज्ञानमेव कृतिकारणं चिकीर्षाकारणं वाच्यमिति प्राहुः॥
अपरेतु उपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादपि चेत्कृतिसाध्यपाक ५

त्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानजन्येच्छातोऽविलक्षणेच्छोत्पद्यतेतदाशुद्धपाकत्वावच्
च्छिन्नधर्मिकसिद्धताज्ञानदशायांकृतिसाध्यताज्ञानसहितात्शुद्धपाकत्वावच्छिन्नविशे
ष्यकेष्टसाधनताज्ञानादिच्छानजायतेकृतिसाध्यपाकत्वावच्छिन्नेविशेष्यकतज्ज्ञानान्नु
यतइतिकथमुपपद्यतामशुद्धपाकत्वादिप्रकारकेच्छात्वस्यतादृशसिद्धत्वज्ञानप्रतिब
ध्यतावच्छेदकत्वेनतत्सत्वेशुद्धपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादिच्छेच्छी
कीयते।।पाकत्वप्रकारकेच्छात्वस्यतत्पालेकृतिसाध्यपाकत्वेष्टसाधनताज्ञानादच्छित ने
दनेनत्वासंरूपतेईश्वरत्वादितिचेन्न।।शुद्धपाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानज
न्यायांचिकीर्षायांपाकोभवतित्याकारकेच्छासाधारणीशुद्धपाकत्वादिप्रकारतानिरूपिता
पविशेष्यतास्वीक्रियतेशुद्धपाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानघटितताहृशविशे
ष्यतानियामकसामग्र्यात्मादृशचिकीर्षीयरवकालेवश्यसत्वात्।एवंचपाकत्वान्यधर्मप्रकार
तानिरूपितविशेष्यतायाः पाकःसिद्धइत्येतादृशज्ञानप्रतिबध्यतावच्छेदकतयातादृशाचि

वीर्यमास्तत्त्वप्रतिबध्यत्वमव्याहतमेव॥ तस्याः पाकव्यतिरिक्तवृत्तिसाध्यत्वप्रकारे त्वेपि तत्प्र
कारत्वानिरूपितपाकोभवत्वित्याकारकेच्छासाधारणविशेष्यतावत्त्वात्तत्साध्यपाक
त्वादिप्रकारकेष्टसाधनताग्रहजन्यचिकीर्षापत्ततादृशविशेष्यतानभ्युपगमात्तस्या
स्तादृशसिद्धत्वज्ञानाप्रतिबध्यत्वान्न कोपिदनुपपत्तिः॥ केचित्तु॥ तद्धर्मविशिष्टेनधर्मि
केष्टसाधनताधीप्रयोज्येच्छानिरूपितोद्देश्यता स्वसमानाधिकरणविधेयतावि
शेषोनुभवसिद्धः॥ अतएवपाकसाध्यं भोजनंभवत्वित्याकारकेच्छानिरूपिततादृशवि
षयतायाः पाकादावभावात्तादृशेच्छावत्त्वेपाकमिच्छामीत्याकारेण न प्रत्ययः॥ तत्र पाका
दिमुख्यविशेष्यकत्वमेवतादृशप्रत्ययविषयो न तु [illegible] विषयतेतिवाच्यं॥
ग्रामोमत्स्वत्ववान्भवत्वहंसुखीस्यामित्याकारकमिच्छ ग्रामादिमुख्यविशेष्यकेच्छा
दशायांग्राममिच्छाम्यात्मानमिच्छामीत्याकारकप्रतीत्यापत्तेः॥ स्वत्वमिच्छामि सुखमि
च्छामीत्यादिप्रत्ययानुपपत्तेश्च॥ नहितादृशेच्छायां स्वत्वसुखयोर्मुख्यविशेष्यताग्रामाद्यं

षे विशेषणतयैव तदुल्लेखात्॥ ननु घटाभेदस्त्वं भवतु ममकुठत्वं भवत्वित्याकारकेच्छातो प्रदर्शिताकाशि
का पीवा चेन्मध्यात्तु भवाप्त्याप्रसंगात्॥ अतएवोपादानप्रत्यक्षस्येच्छाजनाप्रवृत्तिहेतुतामतस्य
सं भवद्वृत्तिकता घटादिसाधनकवपालाद्युपादानकप्रवृत्तौ घटादिमत्त्वेन कपालादिविशेष्यके
पापादवघटादिमत्त्वेन कपालादिप्रत्यक्षस्यतन्मते कारतयासिद्धविशेष्यकेच्छानभ्युपगमेन त
दनुपपत्तेः॥ नहि तत्र कपाले घटो भवत्वित्याकारकेच्छा उपादानप्रत्यक्षकारतासंभवः॥ घट
स्यासिद्धत्वात्तथापि कपाले च टङ्कत्याकारक प्रत्यक्षस्य विशेष्यासन्निकर्षेऽसंभवाद्घटादिमत्त्वेन
कपालादिविशेष्यकस्यैव प्रत्यक्षस्य घटादिसाधकप्रवृत्तिहेतुतया तन्मतेकविशेष्यकत्वेन त
स्य घटादिविशेष्यकेच्छाहेतुत्वासंभवात्॥ ननु घटो मे भवत्वित्याकारकघटामादिसमुदायवि
शेष्यकेच्छापादप्यामादिविशेष्यके घसाधनतातानातनाद्देशेच्छायांसत्त्वादेः तदुपमुद्देश्यतारूप
साधनताया न विशेष्यतापादवतादृशविषयतानियामकत्वात्॥ यदिच्छाम सत्त्वत्वादि धर्मि
केष्टसाधनतानानानानदयामेस्वत्वं भवत्वित्याप्याकारिकैव सा स्यात्तदाकारकेच्छापात्ताद

तहा २

विधि॰

१

शेष्टसाधनताज्ञानस्य हेतुत्वादिति वाच्यं ॥ यथा घटः इष्टसाधनमित्याकारकज्ञानसहकृतेन घट-
वत्कपालमित्याकारकोपादानप्रत्यक्षेण कपालं घटवद्भवत्वित्याकारकोपादानगोचरेच्छाजन्य-
ते तथा स्वत्वमिष्टसाधनमित्याकारकज्ञानस्यालाभः तेन स्वत्ववान्भवामहं इत्याकारकज्ञानेनैव
तथाविधेच्छाजननात् ॥ अस्तु वेष्टसाधनीभूतस्वत्ववान्भवाम्यहं इत्याकारकज्ञानमेव तादृशे-
च्छाजनकं ॥ एतेन स्वत्वादिमुख्यविशेष्यकेष्टसाधनताज्ञानस्य तादृशेच्छाहेतुत्वे तत्र स्व-
त्वमुख्यविशेष्यताविरहप्रयोजकस्य हेतुत्वे च तथा नियमेन स्वत्वं भवत्वित्याकारकेच्छाप्रसंग
इति निरस्तं ॥ अथ वा इष्टताख्यविलक्षणविषयतापन्नद्वितीयार्थत्वं संभवः ॥ कपाले घट-
वद्भवत्वित्याकारकेच्छास्थले घटवत्तेन कपालमिच्छामीत्यादिप्रत्ययात् ॥ तथा चेष्टितस्य-
ले ग्राममिच्छाम्यात्मानमिच्छामीत्यादिप्रत्ययापत्तिर्दुर्वारैवेति चेन्न ॥ यथा वह्निमनुमिनो-
मीत्यादौ विधेयतारूपविषयतापन्नद्वितीयार्थत्वेपि तीयार्थविधेयतानिरूपितत्वावच्छि-
ताविषयतासामान्यापर्यवसानमपि स्वीकृत्य पर्वतो वह्निमानित्याद्यनुमितिस्थले पर्वते तद्व

८

ह्निमत्त्वेनानुमिनोमीत्याकारकप्रतीतिः । तथ्यते ऽद्वितीयपयाद्वितीयाधीविषयतानिरूपितत्वान्
न्वितविषयताशालिमान्यबोधने च ज्ञानत्वावच्छिन्नबोधकधातुसमभिव्याहारस्यानिया
मकतौपगमेन च पर्वतमनुमिनोमीत्यत्र तावन्मात्रप्रतीतिरिति वाच्यं तेनैवाख्यातधातुस
समभिव्याहृतद्वितीयापदार्थस्पतारव्याविलद्गुणविषयतायाकत्वोपपत्तेस्तत्तेनकपालमित्यत्रमी
वा त्याहेत्वतीपैद्देश्यतारव्यतावच्छेदकावच्छिन्नविषयतानिरूपितविषयताशालिमान्यापत्तेरत्व
मापि स्वीक्रियते इति नानुपपत्तिः ॥ तादृशविषयतानिरूपितत्वान्वितविषयताशालिमान्य
बोधेने च ज्ञानापर्यकधातुसमभिव्याहारस्य नियामकत्वे तु कुमारस्याल्पेनापि साम्ये छमीत्या
देनिष्प्रसंगत्वं च पक्षतावच्छिन्नविशेष्यकानुमितित्वगतस्य स्वरूपावत्त्वावच्छिन्नतादृशवि
षयतात्वमेव पराभिव्यातावच्छेदकमिति तत्स्वरूपावत्त्वावच्छिन्नधर्मिकैव साधनतादीज
न्यायेवीव्यपाप्ताः शक्तिवृत्तज्ञानाप्रभिव्याप्तत्वप्रसंगः ॥ इति साध्यत्वस्याधिकस्य तत्रप्र
कारत्वे पुर्वेस्पताव्याविलद्गुणविषयतानवच्छेदकतानत्रस्वरूपावत्त्वावच्छिन्नतादृशवि

विधि.
८
8

पयतावत्त्वस्यादेतत्वात्तद्गुरुत्ववद्भिन्नत्वाप्यवच्छिन्नव्याप्यवत्ताज्ञानजन्यानुमितौ लाघवज्ञानवशा
न्महानसीयत्वादेरन्यथा तस्य भाने पि तस्यावच्छेदकतानवच्छेदकत्वात् तद्गुरुत्ववद्भिन्नत्वाप्यवच्छिन्न
विधेयताकत्ववत्त्व॥ अन्यथा तादृशानुमितेरपि वह्नौ वह्निमानित्यादिसिद्धप्रतिबन्धकत्वापात
त्वात्॥ इति साध्यतावच्छेदकत्वादिनेव साधनतावच्छेदकतानिरूपितसाध्यत्वमहितमेव
पादकत्वमुद्देश्यतावच्छेदकमिति न तस्य ह्यर्थितत्वमिति रत्वमह इत्यायामनुपपत्तिरिति वदन्ति।
अप्यरत्ना साध्यतावच्छेदकस्याचिकीर्षाप्रतिबन्धकत्वमप्रयम्भेवत ज्ञानदशायां चिकीर्षादि
रूपमवादत्ते इति साध्यतावच्छेदकस्य तद्धेतुतया नैवमनेकतावच्छेदकलाघवानुरोधेन
इति साध्यतावच्छेदकस्य हेतुताया नत्वानमुचितमिति वाच्यं॥ अप्रामाण्यानिष्पादनाधिकरणत्वाद
ति साध्यतावच्छेदकत्वेन संशयसाधारण्यं इति साध्यतावच्छेदकस्य हेतुतापावच्छेदकतयातद्रूप
हत्वात् अप्रामाण्यज्ञानानास्कन्दितत्वस्य साध्यतावच्छेदकतानिरूपितायाभावत्वस्य गुरुत्वात्॥ इति साध्य
त्वाभाववत्त्वे इति साध्यत्वप्रकारकत्वरूपाप्रामाण्याभावप्रकारकत्वरूपाप्रामाण्यज्ञानीयनि ८

श्चियत्वस्यातिगुरुशरीरत्वात् ॥ वस्तुतस्तु वृत्तिसाध्यत्वविशिष्टवृत्तौ वृत्तसाध्यतानिरूपकाभावहेतुतापा
आवश्यकत्वात्तत्रज्ञानत्वमनंतर्भाव्य वृत्तिसाध्यताप्रकारकत्वस्यैव ज्ञाप्यैतावच्छेदकत्वमुपेयते ॥ तथा
च वृत्तिप्रकारकत्वैतद्वैवानि वीलाद्यिवीशीयां वृत्तसाध्यतानिरूपकाभावहेतुत्वज्ञापकं वृत्तिसाध्यता
ज्ञानस्य प्रकारत्वमतिरिक्तं कल्प्यनीयमिति लाघवानवकाशः ॥ एतेन वृत्तिसाध्यत्वसामान्यासंता
भावतदवच्छिन्नभेदेन स्वाप्यादिमत्तानिरूपकानामेवांतरसत्वेऽपि नीलीपवद्ध्यारनुतत्वात्तद्रूपप्र
त्येतावतामभावकूटस्य प्रकारतावच्छेदकत्वमनपेक्ष्य वृत्तिसाध्यताज्ञानस्यैवकस्य प्रकारतावच्छेदकत्व
नमेवोचितमित्यपि निरस्तं ॥ वृत्तसाध्यतानिरूपकानंतरं वर्ण्यं चेव्यत्र वृत्तिसाध्यताज्ञाने तत्र वृत्त
साध्यताज्ञानमात्रे ● सत्त्वे वृत्तिसाध्यताप्रकारकत्वमिथ्यात्वेन चीलरशीपमतः वृत्तसाध्यता
निरूपकसत्वेप्यनुपस्थितवृत्तिसाध्यत्वप्रकारकेष्यामनुभवविरुद्धतया तत्प्रकारकज्ञानहेतुत्व
मावश्यकमिति चेन्नहि प्रामाणिकत्वाद्यवच्छिन्नविशेष्यकवृत्तिसाध्यताप्रकारकेऽनुमितित्वप्रसङ्गात् तथा
साध्यत्वप्रकारकज्ञानत्वेन हेतुतावच्छेदकत्वमपेक्ष्य लाघवात् तदनुपस्थितवृत्तिसाध्यत्वप्रकारके

विधि.

९

छापावारणाय कृतिसाध्यत्वप्रकारकेच्छां प्रति तद्विषयकज्ञानत्वेन हेतुत्वमुपेयते ॥ वस्तुतस्तु ॥ कृ
तिसाध्यतात्वविशिष्टवैशिष्ट्यबोधे कृतिसाध्यतात्वप्रकारकज्ञानस्य हेतुतया तत्रैव ज्ञानत्वमपि
वेशेच्छासाधारणतद्विशिष्टवैशिष्ट्यावगाहित्वस्यैव जन्यतावच्छेदकत्वोपगमे न चिकीर्षायां कृति
साध्यताज्ञानस्यातिरिक्तकारणताकल्पनविनैवातिप्रसंगनिरासः संभवतीति ॥ एवं
पाकत्वाद्यवच्छिन्नविशेष्यतानिरूपितकृतिसाध्यत्वप्रकारताकत्वस्येच्छादिसाधारणस्य तादृ
शकृतिसाध्यतानिश्चयस्य प्रतिबध्यतावच्छेदकत्वेन संभवति ॥ कार्याहार्यीच्छादेरुपपत्तये
चाहार्याद्यन्यत्वेन तेषां तदुत्तेजकत्वानुरोधेन प्रत्यक्षस्थले चाक्षुषत्वादौ नोक्तदोष इति तत्स्थ
ले च परोक्षत्वजातिविशेषस्य विपरीतज्ञानप्रतिबध्यतावच्छेदकतायामवश्यमुपगंतव्यतया त
परोक्षत्वजातेरविनेच्छासाधारण्यसंभवः ॥ ज्ञानत्वजात्यासंकरात् ॥ न चेच्छासाधारण्या
नुरोधेन प्रत्यक्षान्यत्वस्यैव प्रत्यक्षातिरिक्तस्थले प्रतिबध्यतावच्छेदकत्वमुपेयं न तु परोक्ष
त्वजातेरिति वाच्यं ॥ अनंतानां ज्ञानाभावत्वाप्यतद[illegible]वच्छेदकधर्मज्ञानानां प्रतिबध्य

तावच्छेदकतोद्देशपरोक्तत्वमुपेक्ष्य प्रत्यक्षज्ञानत्वस्य गुरुशरीरस्य निवेशानपेक्ष्य कृतिसाध्य
त्वप्रकारकज्ञानस्यैव हेतुतापाद्यप्रतिकल्पयितुमुचितत्वात् ॥ प्रत्यक्षज्ञानत्वस्यैव स्वरेच्छा
कृतिसाधारणतया जन्यत्वस्यापि निवेशनीयतया तेन समं प्रत्यक्षज्ञानत्वस्य विशे
ष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यप्रसंगाच्च ॥ न च स्म
वन्मते कृतिसाध्यताज्ञानजन्यतावच्छेदकस्य चिकीर्षात्वस्य स्वरेच्छासाधारणतया
जन्यत्वस्यापि निवेशनीयत्वेन चिकीर्षात्वजन्यत्वयोर्विशेष्यविशेषणभावे विनि
गमकाभावविरहात् कृतिसाध्यताज्ञानहेतुतानंतरं भावस्यैकमितिवाच्यं ॥ अ
नंते[illegible]ऽपि कृतिसाध्यताभावादिनिश्चयाभावानामुक्तविनिगमनाविरहेणाने
नाकारणताकल्पनापेक्षया कृतिसाध्यताज्ञानस्यैकैकस्य चिकीर्षात्वजन्यत्वयो
र्विशेष्यविशेषणभावे विनिगमनाविरहेण नानाकारणताधिकस्यासंभवित
त्वादिति दिक् ॥ निष्फले चैतदेवं रनादेश्चिकीर्षाप्रवृत्त्योरनुदयादिष्टसाधनताज्ञा

नस्यात्तद्धेतुतास्वीक्रियते॥ तत्र पाकत्वाद्यवच्छिन्नविशेष्यकेष्टत्वमेव पाकत्वाद्यवच्छिन्नवि
शेष्यकेष्टसाधनताज्ञानजन्यतावच्छेदकमुपेयते॥ न तु तादृशचिकीर्षात्वं इति साध्यता
प्रकारकत्वस्य निवेशेऽपि साध्यत्वाप्रकारिकायां पाको भवत्वित्याकारिकेच्छायां तद्धेतुता
न्तरस्य कल्पनीयतया गौरवात्॥ इष्टसाधनताज्ञानस्य भूतकाले चैत्रो मा[illegible] विरह
देव न कृतिसाध्यताज्ञाने न चिकीर्षा जन्यते चिकीर्षात्वस्येष्टसाधनताज्ञानजन्य
तावच्छेदकत्वानाक्रान्तसुखादिचिकीर्षासाधारण्येऽपि पाकत्वाद्यवच्छिन्नविशेष्यकचिकी
र्षात्वरूपत्वादृशकृतिसाध्यताज्ञानजन्यतावच्छेदकस्य सुखादिचिकीर्षासाधारण्याभा
वादिष्टसाधनताज्ञानस्य पक्षमान्यसामग्रीत्वमस्त्येव॥ पाकसाध्यसुखत्वादिमत्ता
रकेच्छायां पाकादिधर्मिकेष्टसाधनताज्ञानस्य व्यभिचारवारणाय तद्धर्मिकेष्टसाध
नताज्ञानस्य जन्यतावच्छेदककोटौ तदीयमुख्यविशेष्यतानिवेशनीया॥ उद्देश्यतारव्य
विलक्षणविषयतायाः प्रामाण्यकत्वेन तदुद्देश्यत्वमेव निवेश्यं न तु तन्मुख्यविशेष्य

कृतेः कारणतावच्छेदककोटौ निविष्टं इष्टत्वमिच्छाविषयत्वं स्वरूपसदेव फलविशेषणं ॥ ननु तदं

शे तत्त्वान्तर्भावितेन तथा सति फलस्वरूपसत्त्वेनेच्छाविरहेपि इष्टत्वज्ञानसंभवात्तत्कृतौ दनोद्दे

रप्युपायेच्छाप्रसंगात् ॥ अथ स्वरूपसदिच्छाविषयसाधनताज्ञानस्योपायेच्छाहेतुत्वेयत्रे

ष्टत्वादिप्रकारेण फलविषयिणीच्छा तत्र द्रव्यत्वादिरूपेण फलविषयकात्कृतिसाधनता

ज्ञानात् तद्विपाकादिगोचरेच्छाप्रवृत्तेः ॥ इच्छाविषयतावच्छेदकधर्मावच्छिन्नसाधनताज्ञा

नहेतुतास्वीकारेपि स्वरूपतः कृतौ इष्टत्वादिप्रकारकेच्छादशायां प्रमेयत्वादिना तत्प्रका

रकौदनादिसाधनताज्ञानादतिप्रसंगो दुर्वारः ॥ एवं फलान्तरीयेच्छाविषयतामादायापि

कृतेर्दनस्यापि पाकेच्छाप्रसंगः ॥ न च कारणतावच्छेदकविशेषणकारणस्य प्रवेशस्तत्प्राः

प्रवृत्ते फलोपधानप्रयोजकत्वोपगमात् कारणतावच्छेदकीभूतेच्छाविरहदशायां नाति

तिप्रसंग इति वाच्यं ॥ तथा सति कारणतावच्छेदकघटकफलाप्रसिद्धे इच्छाप्यनुत्प

त्तिप्रसंगात् ॥ एवं पुरुषान्तरीयफलेच्छामादायाप्यतिप्रसंगः ॥ न चेच्छत्वं प्रकार

ष्टफलेच्छात्वेन तद्धर्मावच्छिन्नसाधनताज्ञानत्वेन चात्मनिष्ठप्रत्यासत्त्या हेतुत्वोपगमे
तन्ननुगमाद्व्यभिचारप्रसंग इति चेन्नैवं । साधनतावच्छेदकादिभेदेनाभिन्नापाया
प्येरननुगमेन तद्धटितपरामर्शानिष्ठानुमितिकारणतावच्छेदकस्याननुगतत्वे
पि ऋगत्या स्वस्वसमानाधिकरणावच्छिन्नस्वाव्यवहितोत्तरत्वसंबंधेन तत्तद्धर्माव
च्छिन्नवैशिष्ट्यकापेक्षतावच्छेदककोटौ निवेशपनाना धर्मप्रकारेच्छैवैकानुविधा
नुमितिहेतुतास्वीक्रियते तथा चाप्यगत्या तादृशसंबंधेनोदनत्वादिप्रकारकेच्छाविशि
ष्टपाकादिगोचरेच्छां प्रति तादृशेच्छात्वेन पाकत्वावच्छिन्नविशेष्यताकोदनत्वावच्छ
च्छिन्नसाधनताज्ञानविशिष्टपाकादीच्छां प्रति तादृशज्ञानत्वेन नानैव हेतुत्वानि ११
स्वीक्रियतेऽतो न व्यभिचारः ॥ तद्धर्मप्रकारकेच्छात्वद्धर्मावच्छिन्नसाधनताज्ञानयोः
परस्परसहकारेण च फलोत्पादप्रयोजकत्वात् । ओदनत्वादिप्रकारकेच्छासहकृत
तेमनादिसाधनताज्ञानान्न पाकादाविच्छा निर्व्वत्तफलेच्छाजन्यतावच्छेदके

[redacted] फलसाधनताज्ञानजन्यतावच्छेदकयोर्व्याप्यव्यापकभावविरहेऽपि तयोः
परस्परसहकारेण फलोपधायकत्वसंविलनं॥ कार्यतावच्छेदकसामानाधिकरण्यमात्रस्यैव
तन्त्रत्वात्॥ अस्तु वा तत्तत्फलेच्छाविशिष्टत्वस्यापि तत्तत्फलसाधनताज्ञानजन्यतावच्छेदक
त्वमिति निष्कर्षः॥ परे तु स्वसमानकालीनतद्धर्मावच्छिन्नफलसाधनत्वप्रकारतानिरूपिततत्त
द्धर्मावच्छिन्नविशेष्यताकत्वस्वसामानाधिकरण्योभयसंबन्धेनेच्छाविशिष्टज्ञानत्वेन
तेनाधर्मावच्छिन्नफलसाधनताज्ञानानामननुगमः॥ अत एव स्वीयतत्तद्धर्मावच्छिन्नवि
शेष्यतानिरूपितसाधनत्वप्रकारतानिरूपितफलप्रकारतावच्छेदकप्रकारकत्वस्व
सामानाधिकरण्योभयसंबन्धेन ज्ञानविशिष्टेच्छात्वेनैवाके हेतुत्वं नोपपद्यते इति वदन्तु
वितिगमनाविरहात् तेनापि रूपेण फलेच्छायां हेतुता॥ वस्तुतस्तु फलेच्छायां हेतुत्वे ज्ञा
त्वानिवेशप्रत्यासत्तिरेवाद्दरणीया तथा चैकधर्मावच्छिन्नविशेष्यताकफलसाधनताज्ञा
नादन्यधर्मप्रकारकेच्छावारणाय प्रकारविशेषानिवेशनस्यावश्यकतया प्रकारमे

विधि वा०
१२
12

इतनकारणतामेवाङ्गीरवं फलसाधनताज्ञानस्य च विशेष्यतावच्छेदकतासंबंधेन प्रकारत
प्रत्यासत्त्यैच्छां प्रति प्रकारविशेषप्रवेशनतन्नर्थक्ये प्रकारणताकल्पनेनातिप्रसंगवारणसं
भवान्न तद्रूपेण कारणताभेद इत्त्वेन विनिगमकं ॥ न च चैत्रीयेष्टसाधनत्वप्रकारकेच्छासहितं पाकेष्ट
दृष्टसाधनं दृष्टे ज्ञापादसाधनमित्याकारकसमूहालंबनज्ञाने व्यभिचारो न तु घटादिगोचरे
च्छा तत्र दर्शितप्रत्यासत्त्येष्टसाधनत्वप्रकारकेच्छाविशिष्टस्य तादृशफलसाधनताज्ञानस्य ध
र्मितावच्छेदकताप्रत्यासत्त्या पाकत्वादावविद्यमानत्वात् तत्र प्रकारतासंबंधेनेच्छा
प्रविशिष्टेवाच्या ॥ तत्प्रकारीभूतधर्मावच्छिन्नफलसाधनत्वप्रकारतानिरूपितत्वसंबंधे
नेच्छाविशिष्टविशेष्यतावच्छेदकतासंबंधेन ज्ञानत्वेन हेतुत्वोपगमात् दर्शितस्थले घटादिसा
धनताप्रकारतानिरूपितदेवत्वावच्छिन्नविशेष्यतायामदर्शसंबंधेनौदनत्वादिप्रका
रकेच्छाविशिष्टत्वाभावेनातिप्रसंगविरहात् ॥ संबंधतावच्छेदकसंबंधस्याव्यवहितप्राक्
द्रोणसत्त्वात्ताः कार्यत्वात् प्रयोजकत्वोपगमात् कालांतरीयेच्छामादायातिप्रसंगः ॥ एवं १२

पुरुषान्तरीयफलेच्छामादायातिप्रसंगवारणाय तत्तत्पुरुषीयत्वमपि कार्यकारणभावघटकविशेष
णमुपगन्तव्यं॥ आदिना मन्तव्यमिति परमते साक्षात्कार्यकारणघटकप्रत्यासत्तिविचारेऽनुसंधे
यमिति॥ अत्र च स्वरूपत इष्टत्वादिप्रकारकेच्छा इष्टसाधने प्रमेयत्वादिनेष्टत्वादिप्रकारका
त्वमेव च साध्यतं मात्र इष्टत्वादिनानात्वमेयत्वादिनेष्टत्वादिप्रकारकेच्छा इष्टसाधनत्वरूपत
इष्टत्वादिप्रकारकादेः इष्टसाधनतापाकइष्टत्वादिनानाजपाकादिगोचरेच्छावारणायानव
च्छिन्नप्रकारतासमानाधिकरणनिरवच्छिन्नावच्छेदकताकफलप्रकारतानिरूपितसाधनत्व
प्रकारतानिरूपिततत्कर्मावच्छिन्नविशेष्यतावृत्तसंबंधेन तानेष्टात् इष्टसाधनत्वप्रकारता
निरूपितत्वसंबंधेन कारणतावच्छेदकप्रत्यासत्तिघटकविशेष्यतासंबंधेच्छायां वैशिष्ट्यं नि
वेशनीयं॥ एवं चाकिंचिद्रूपेण फलतावच्छेदकप्रकारकेच्छासहितस्य तेन रूपेण तत्प्रकारकफ
लसाधनताज्ञानस्यान्वयतात्पर्यस्य पुरुषीयत्वाकारणतांतरे तत्तन्नीयामित्यवनमनुगमतादृ
वस्य॥ एवमेकसंबंधेन फलतावच्छेदकधर्मप्रकारकेच्छायामन्यसंबंधेन फलतावच्छेदक ह

९२

विधिवा०
13
१२

धर्मप्रकारकफलसाधनताज्ञाने सत्युपायेच्छावारणाय तत्संबंधेन फलतावच्छेदकधर्मप्रका
रकेच्छावैशिष्ट्यं तत्संबंधेन फलतावच्छेदकधर्मप्रकारकफलसाधनताज्ञाने विशेषणीयं तथा
च संबंधांतरेण फलतावच्छेदकधर्मप्रकारकेच्छासहितस्य तेन संबंधेन फलतावच्छेदकप्र
कारकफलसाधनताज्ञानस्यासंग्रह इति तस्यापि कारणत्वांतरं कल्पनीयमिति ताननुग
मइति कारणवैशिष्ट्यं कार्यतावच्छेदककोटौ विनिवेश्य व्यभिचारवारणमपास्तमे
या वेति चिंतनीयं॥ अथोपायेच्छानुपायधर्मकेष्टसाधनताज्ञानमिष्टधर्मिकोपायसाध्य
ताज्ञानं वा हेतुरित्यत्र किं विनिगमकं॥ न चोपायधर्मकेष्टसाधनताज्ञानस्य प्रकारता
संबंधेनेच्छां प्रति धर्मितावच्छेदकत्वेऽप्यस्य तथा प्रकारविशेषमनिवेश्य कारणत्वसंभ
वेनान प्रकारभेदेन कारणताभेदः फलधर्मिकोपायसाध्यताज्ञानस्य च न तादृशास
त्यासत्तिः स्वीयत्वेनाप्युपस्थिततदुपेयतद्वितिवाच्यं॥ पाकसाध्यताऽन्नरत्वादिज्ञा
नस्यापि पाकत्वादिप्रकारविशेषमनंतर्भाव्य फलविशेष्यतानिरूपितसाध्यत्वप्रका

वै+ रा२

रतानिरूपितप्रकारतावच्छेदकत्वसंबंधेन कारणत्वसंभवाद्भवतापि फलप्रकारतानिरू
पितसाधनत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतया कारणतायाः स्वीकरणीयतयोभयपक्ष
ने तुल्यत्वात्॥ यत्तु साधनत्वस्य व्यवहितसाध्यकालावच्छेदेन कार्यसमानाधिकरणयोऽभा
वकालव्याप्तियोगितानवच्छेदकधर्मवत्त्वरूपनियतपूर्ववर्त्तित्वघटितं साध्यत्वं च तादृशाधर्मी
वच्छिन्नसामानाधिकरण्यरूपनियतोत्तरवर्त्तित्वरूपमिति गुरुशरीरमतस्तृष्णा न हेतुः ॥ ने गमनव्याप्तिसिद्ध
न च नियतोत्तरवर्त्तित्वं नोक्तरूपमपि तु यदा यत्र कारणाभावकालव्यवहितोत्तरक्षणे तत्र
कार्याभाव इत्येवंरूपं कारणाभाववद्वृत्तित्वरूपं स्वावच्छेदकक्षणाव्यवहितोत्तरक्षणा
वच्छिन्नस्वाधिकरणवृत्तित्वसंबंधेन कारणाभावे न तदधिकरणत्वेन कार्याविशिष्टं यत्त्र
दन्यत्वपर्यवसितमेव तदपि नियतपूर्ववर्त्तित्वापेक्षया गुरुशरीरमिति वाच्यम्॥ कार
द्वे न णविशेषाप्रगमे कार्यानुदयेन स्वरवृत्तित्वमित्यत्र तदनुत्पत्तिकत्वपर्यन्तस्यापि निवेश
नीयतया गुरुशरीरोत्पत्तिघटितत्वेनास्यापि नियतपूर्ववर्त्तित्वापेक्षया गुरुशरीरत्वादि

तितन्मते भ्रमं ॥ तथा हि निरुक्तानियतपूर्ववर्त्तिताघटितसाधनताज्ञानस्येष्टप्रवृत्तिहेतुत्वे
स्वर्गकामो यजेतेत्यादौ स्वेष्टनिरूपिततादृशसाधनत्वमेव विधेयार्थः । स च बाधितस्त
था विधयागत्वादेरिष्टभोजनादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात् ॥ न त
स्वर्गसामानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं तत्र प्रतीयत इति वाच्यं ॥ शास्त्रानं
त्याभयेष्टत्वरूपेण स्वर्गादिफलस्य विधेयघटकतया मालिकाकारेणैव सिद्धत्वात् ॥ व्यु
त्पत्तिवैचित्र्या स्वर्गकामपदोपस्थापितस्वर्गस्येष्टांशेऽभेदान्वयोपगमेऽपि फलकाम
बोधकपदसमभिव्याहृतविश्वजिता यजेतेत्यादौ गत्यभावात् ॥ याज्ञं विनापि गंगास्ना
नादितः स्वर्गोत्पत्त्या स्वर्गसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्यापि या
गत्वादौ बाधितत्वात् ॥ यागजन्यतावच्छेदकस्वर्गनिष्ठवैजात्यस्य गृहीतकार्यकारणभा
वानुपपत्त्यैवाग्रे कल्पनीयतया प्रागनुपस्थितेः स्वर्गवृत्तिजातिसमानाधिकरणाभावप्रति
योगितानवच्छेदकत्वस्य विधिबोध्यत्वशंकाया अप्यनुदयात् तस्मान्निरुक्तानियतो

त्तरवर्त्तित्वनिरूपकत्वमेव नियतपूर्ववर्त्तित्वे वाच्यमिति तदेव गुरुशरीरं॥ वस्तुतस्तु॥ साधनत्वं
स्वरूपसंबंधरूपपदार्थान्तररूपं वा वस्तु स्वीकार्यं न तत्त्वन्यथासिद्धनियतपूर्ववर्त्तित्वरू
पं अन्यथासिद्धभेदकूटस्य पुत्रसहस्रेणापि ज्ञातुमशक्यत्वात्॥ अन्यथासिद्धत्वस्यानु
गतस्य लक्षणस्य दुर्वचत्वात्॥ नियतपूर्ववर्त्तित्वस्यापि पयःपानकारणतेत्याशातिक्वि
करूपेण भेदकूटस्यैव कारणताशरीरे निवेशनीयत्वात्॥ न च नियतपूर्ववर्त्तित्वाश
मात्रस्यैव ज्ञानं हेतुरिति स्वमवगतिः अरनियतपूर्ववर्त्तितावच्छेदकप्रमेयत्वादिमतिमा
वेत्रैव तादृशफलापत्तेर्निमित्तामत्रत्वापत्तेरिति॥ एवं च साध्यत्वमपि तद्रूपमेव तुल्य
युक्तेरिति कथितविनष्टमन्नाविरहो दुर्वार एवेति॥ मैवं॥ पाकत्वावच्छिन्नविशेष्य
कइष्टसाधनताज्ञानस्य पाकत्वप्रकारकेच्छां प्रति हेतोर्दर्शितपाकत्वादिनिष्ठप्रत्यासत्त्या
हेतुत्वं वृत्ताकत्वादिरूपमनेन तत्तद्व्यापारसाध्यकोदनत्वादिज्ञानस्यापि तन्निष्ठप्रत्या
सत्त्याहेतुत्वकं भवः॥ पाकसाध्यत्वाभाववति पाकसाध्यत्वप्रकारकज्ञानमित्याका

रकाप्रामाण्यग्रहाभावस्यकारणतावच्छेदकत्वानुरोधेन पाकत्वाद्यंतर्भावस्यावश्यकत्वा
त्॥ नचैवमोदनसाधनत्वप्रकारतानिरूपितपाकादिविशेष्यतायामोदनसाधन
त्वाभाववद्वृत्तित्वज्ञानाभावस्यकारणतावच्छेदकत्वानुरोधेन भवतामपि पाकत्वा
द्यंतर्भावस्यावश्यकतेति वाच्यं॥ तादृशज्ञानस्यौदनसाधनत्वाभाववद्वृत्तित्वप्रकारता
निरूपितापाकौदनसाधनत्वप्रकारतानिरूपितत्वावच्छिन्नविशेष्यतानिष्ठविशेष्यता
ख्यापेक्षत्वसंबंधावच्छिन्नतदवच्छेदकतावच्छेदकत्वरूपपाकत्वादिनिष्ठविषयता
विशेषसंबंधेनैवाभावेनिवेशात्पाकत्वाद्यंतर्भावस्यावश्यकत्वात्॥ पाकसाध्यत्वा ना ८
भाववतिपाकसाध्यत्वप्रकारकत्वादिरूपाप्रामाण्यग्रहस्यचपाकत्वादिकमनंतर्भा
व्यपाकत्वादिनिष्ठविषयताविशेषसंबंधेनाभावोनप्रकारतेनैवेशापितुतादृश
ज्ञानीयपाकत्वादिविषयतायाहेतुविधेयेनैकविधतदीयविषयतायाःसंबंधत्वे
+ पाकसाध्यकौदनइत्यादिज्ञानादिष्टसाधनत्वस्योपपादनासंभवात्॥ कथंचिदुपपाद

१ अन्यविधतदीयविषयतायास्तदीयत्वेनविशिष्यनिवेशस्यावश्यकत्वात् अन्यथा दं ३ साध्यत्वाभाववतिपाकसा
१ ध्यत्वप्रकारकत्वप्रकारकज्ञानसत्वे

न संभवेदिति पाकादिसाध्यत्वाभावहेतुः वह्निशेषत्वानिरूपितत्वे धर्मितावच्छेदकघटकतया
स्म
पाकत्वादिविषयतातत्संबंधावच्छिन्नप्रतियोगिताकस्य पाकादिसाध्यत्वप्रकारक
ले
त्वांशे विशेषणतावच्छेदकतया तत्संबंधावच्छिन्नप्रतियोगिताकस्य चाऽभावस्य निवे
शे विनिगमनाविरहात् उभयनिधाभावस्यैकनिवेशनीयतयोः रवस्पर्द्धवचत्वात् त्वा
घवगौरवविरहे समानविशेष्यकत्वमेवोक्तज्ञानादिकारणतापाविनिगमकं॥ अ
थ रूपि विशेषोऽदृष्टवसाधकः इति न्यायात् तत्प्रागभावकवलेनैव तत्साध्यताः प्र
ती
वृत्तिहेतुत्वस्यापि प्रमाणिकतानिराकृतत्वादित्यपि कश्चित् ॥ एतेनानिरूपितत्वेन
संबंधेन फलविशेषितसाध्यनताया स्वपत्तासंबंधेनोपायविषयकज्ञानमाधे
यतासंबंधेनोपायविशेषितसाध्यनतायानिरूपकत्वसंबंधेन फलविशेष्या
कज्ञानं वा हेतुरित्यत्र विनिगमकाभावइत्यपि निरस्तं॥ यत्तु मिश्रैरभिहितं ग
उणयानुयोगिकेष्टप्रतियोगिकसाध्यनताविषयकज्ञानत्वेन साधारणधर्मे

विधि॰
१६
16

एतादृशसाध्यपविशिष्टस्यैव ज्ञानस्य हेतुत्वेति तन्न वाच्यं एवं तादृशसाधनताविषयक
ज्ञानत्वस्याकारणतावच्छेदकत्वे इष्टसाधनता भ्रमस्याहेतुतापत्तेः ॥ इष्टविषयतानि
रूपितसाधनताविषयतानिरूपितो पापविषयताख्यातिज्ञानत्वस्य तत्पापत्वे पाक
साधनमोदनमित्याकारस्याश्रयता संबंधेनौदनं शे पाकनिरूपितसाधनताप्र
कारकस्यौदनसाधनकः पाक इत्याकारकस्य निरूपकता संबंधेन पाकांशे ओदन
निष्ठसाधनताप्रकारकज्ञानस्य तज्ज्ञानस्य च पाककोचरेच्छादिहेतुतापत्तेः फलवि
षयतानिरूपितनिरूपितत्वीयसंसर्गतानिरूपितसाधनताविषयतानिरूपि
ताश्रयत्वीयसंसर्गतानिरूपितो पापविषयताया भ्रमापत्तेः पाकसाधनत्वकाओ
दनमित्येतादृशतानां संग्रहस्तत्र साधनत्वांशे पाकस्याधेयता संबंधेनैव प्र
कारतयाऽऽश्रयत्वीयसंसर्गतानिरूपितो पापविषयताविरहान्निरूपकत्व संबं
धेनैव फलांशे साधनतायाः प्रकारतया निरूपितत्व संसर्गतानिरूपित

१६

साधनत्वविषयताविरहात्साध्याश्रयत्वाधेयत्वयोर्निरूप्यत्वनिरूपकत्वयोः खलु तस्य
विनिवेशितया तत्रापि पाकांशे साधनतस्याश्रयत्वे साधनत्वांशे फलस्य निरूपितत्वे
संसर्गतया भासते एवं कृतिपाकांशे साध्यनतापि स्वरूपसंबंधविशेषे च कारकत्वमपि
एवमेव तथा कृतिपाके रजनविषयतायां विशेष्यतात्वप्रकारतात्वाभ्यामपि निवेश
संभवे विषयतात्वेन निवेशे सामान्यत्वमेव विनिगमकं कलादीनामप्या
श्रयपदप्रवृत्तिनिमित्ततावच्छेदकत्वसंभवे एकैकत्वस्य तथात्ववदिति चेन्न कदाचित् प्रसि स्पश ३६
द्धे तादृशार्थसंधाने स्वरूपमनियमेप्यनुमित्यादौ तस्याप्रामाणिकत्वात् विषयतात्वेन
पाकादिविषयतानिवेशे साधनत्वाधेयांशे साश्रयत्वादिसंबंधेन पाकादिविशेषणकत्वे
हेतुतापत्तेस्तद्वैलक्षण्यं तनीयमन्यथानुफलाविशेष्यकोपायसाध्यतानोनस्यभवनादिवत्वे
विधिवाक्यात्साध्यपाकसाध्यमितिप्रमित्यवबोधः स्त्रीकरणीयः तन्निर्वाहाय च
साध्यत्वविशिष्टे एवविधिशक्तिरूपेयातथा च तदेकदेशे साध्यत्वे मत्वर्थस्यान्वयो

विधि॰
११
17

पगमेव्युत्पत्तिविरोधः साध्यत्व इष्टत्वे च प्रत्येकशक्तिद्वयकल्पने गौरवमिति चेत् साधन
ताज्ञानमेव प्रवर्त्तकमिति तदसत्॥ निरूपितत्वसंबंधेन पदार्थस्य पदार्थैकदेशा
न्वयितायाव्युत्पत्तिसिद्धत्वात्॥ अन्यथा चैत्रादन्यदृत्यादौ गत्यभावात्॥ प्रवृत्ति
तामस्ति तद्धिरभिहितं॥ तत्र साध्यत्वरूपैकस्यापि अन्वयप्रयोगे बोधयित्वात् तत्साध्य
त्वेनैव लिङ्गबोधयितुं न शक्यते॥ एकस्यापि अन्वयमपरपदार्थबोधयित्वात् तदवच्छि
तापरस्यापि अन्वयबोधकत्वस्य पदानामव्युत्पन्नत्वादिति तदप्यकिंचित्करं॥ इष्ट
साधनतायाविधेयतामेतद्यथायुगपदेवकृतिसाध्यत्वे इष्टसाधनत्वयोरेकत्र
द्वयमितिरीत्यायागादौ भानं तथाविशेष्यविशेषणतत्रापि विशेषणांतरमितिरीत्या
कृतिसाध्यत्वविशेषितमागसाध्यत्वे इष्टस्य प्रथमं एवान्वयो यागमेवाबाधकविर
हात्॥ एकस्यापि विशेषितापरपदार्थविशेषितस्यापि अन्वयज्ञानजनकत्वे [redacted]
ऽध्यतत्वे पदानांज्ञानानीत्यादौ वर्त्तमानत्वरूपाख्यातार्थान्वितज्ञानादिविशे

नेरु

१८

तात्रयत्वादिरूपापन्नस्वार्थबोधकतायाअसत्त्वात् तस्य सर्वसंमतत्वात् ॥ अपूर्वचेति साध्ययागसाध्यमि
ष्टमिति ज्ञानं विशेष्ये विशेषणमिति न्यायेन न संभवति न प्रवर्त्तकं साध्यतायां यागत्वावच्छ
िन्नानिरूपितत्वानवगाहित्वात् तद्धर्मोपलक्षितक्रियानिरूपितसाध्यतावगाहित्वान्न स
प्रवर्त्तकत्वं इष्टसाधनतानि ॥ प्रसक्तत्यागस्त्वमात्रेण न प्रमेयत्वादिप्रकारेणापि प्रवृत्त्याप
त्तेः ॥ न चैतादृशज्ञानस्य पूर्वमिति साध्यत्वविशिष्टवैशिष्ट्यावगाहित्वासंभवेपि यागत्वादिविशि
ष्टवैशिष्ट्यावगाहित्वे बाधकाभावात् प्रवर्त्तकत्वमव्याहतमेवेति वाच्यं ॥ विशेषणांशे विशेष्य
णस्यैकस्य वैशिष्ट्यप्रतियोगितावच्छेदकतयाऽपरस्य चोपलक्षणतया भानानभ्युपग
मात् अत एव घटः सामान्याभावबोधे प्रतियोगितांशे उपलक्षणविधया नीलादिभानं नी
लो घटो नास्तीत्याकारकं तात्पर्यं नैकेनाप्यनुमन्यते ॥ यागः इति साध्यत्वं च यागसा
ध्यमित्याकारकसमूहालंबनशाब्दबोधस्य तत्रोपगमे च वाक्यभेदप्रसंग इति चेन्न
विधिजन्यज्ञानस्य साध्यत्वप्रकारकमिष्टजनकं च मदीयत्वेनेदानीं तनत्वेन च हृत्सनव

कं भून ३

वि॰ धि॰ वा॰
१८
18

गाहित्वात्॥ अनुगमकेनेष्टत्वेनेष्टविषयकत्वात्॥ सुखत्वादिना सुखत्वादिजनकत्वावगाहि
न इष्टानीतनमष्टीयकृतित्वेन कृतिसाध्यतावगाहिन एव ज्ञानस्येच्छाद्वारा प्रवर्तकत्वात्॥
किं तु तदुत्तरभाविताद्दशमानसादिज्ञानमेवेति मणिकारेणैवाभिधानात्॥ विधिजो
न्यस्माद्बोधस्य यागत्वविशिष्टेष्टवैशिष्ट्यावगाहित्वेपि यागः कृतिसाध्यः यागसाध्यं
च सुखमित्याकारकतद्विशिष्टवैशिष्ट्यावगाहिसमूहालंबनज्ञानांतके[illegible]स्यापि कृत
यातस्य प्रवर्तकतासंभवात्॥ परे तु॥ यागसाध्यत्वेनेष्टविषयकस्माद्बोधोपगमे स्व
र्गकामानन्वयप्रसंगः इष्टसाधनताया विधेयार्थत्वे इष्टसाधनं कृतिसाध्ययागानु
कूलकृतिमान् स्वर्गकाम इत्येवान्वयबोधात् स्वर्गकामस्यापि तत्र प्रवेशात्॥ न च मन्म
ते पितृतो स्वर्गकामान्वयोपगमात् स्वर्गकामस्य कृतिसाध्ययागसाध्यमिष्टमित्येव
माद्बोध इति न स्वर्गकामाप्रवेशो व्युत्पत्तिवैचित्र्यात् कृतिसाध्यत्वैकदेशेपि कृतौ तद
न्वयसंभवात्॥ वस्तुतस्तु॥ कृतिसाध्यत्वं न विधेयार्थापि तु लाघवात्समानाधिकृतेरे

१८

स्साध्यतासंबंधेन धात्वर्थे भानमुपेयते प्रवर्त्तकमपि लाघवात्साध्यतासंसर्गकज्ञान
मेवेति नैकदेशान्वय इति वाच्यं। एवमपि स्वप्नमात्रपदार्थस्य सुखादिविशेष्यतया प्रसादबोधे
भानस्यानुभवसिद्धस्य परित्यागप्रसंगादितीष्टसाधनत्वमेव विधीयते तत्रापि वदंति।
अपराज्ञविनाशादेरिष्टसाधनतया रूपं तत्रेष्टप्रवृत्तौ न च दुःखाभाव एवेष्टं। तदत्वे
नाभावप्रागभावयोरजन्यत्वेन तदिष्टसाध्यत्वात्। शत्रुविनाशे तदधीनदुःखानुत्पाद
नुत्पन्नस्य च दुःखस्य विनाशासंभवेन दुःखनाशस्याप्युद्देश्यत्वात् न चेष्टप्रयोजकता
५ कं ज्ञानप्रयोजक कार्यानुत्पादं प्रति कारणाभावस्य प्रयोजकतया दुःखानुत्पादरूपेष्ट
प्रयोजकताज्ञानादेव शत्रुविनाशादाविष्टप्रवृत्तौ इति वाच्यं। प्रयोजकत्वस्य दुर्वचत्वात्
व्याप्यत्वरूपस्य व्यापकत्वरूपस्य वा तस्यातिप्रसक्तत्वादिति चेदेतत्सर्वं धनेगुरुमत मा ३
निराकरणावसरे स्फुटीभविष्यति। बलवद्दुःखाविषयदुःखफलकृतयागादिमात्रे मधु
विषसंपृक्तान्नभक्षणादेरिष्टप्रवृत्त्यनुदयाद्बलवदनिष्टाजनकत्वज्ञानस्यापि हेतुता

विधि॰ वा॰ स्वीक्रियते ॥ बलवदनिष्टत्वं च बलवद्द्वेषविषयत्वं ॥ ननु स्वजन्येष्टोत्पत्त्यनांतरीयकदुःखत्वं नां-
तरीयकत्वस्य दुर्निर्वचत्वात् ॥ तथाहि दुःखजनकजन्येष्टव्याप्यत्वं व्यापकत्वं वा अभ-
१५ दयमहोण्यादिजन्यसुखादेरन्नजलानयनकादिरूपदुःखेन समं मिथो दैशिकव्याप्यव्या-
पकभावसत्त्वेन तादृशदुःखस्यानांतरीयकतयाऽनांतरीयकदुःखजनकत्वज्ञानसंभवे-
नतात्विकस्यापि तत्रेच्छाप्रवृत्तिप्रसंगात् ॥ कालिकस्य व्याप्यत्वस्य व्यापकत्वस्य वा विव-
१४ क्षणे रागांधस्यापि तत्रेच्छाप्रवृत्त्यनुदयप्रसंगात् ॥ बलवत्त्वं च द्वेषगतो जातिविशेषः
द्वेषे तस्य विशेषणत्वं च स्वजनकत्वेन ज्ञायमाने स्वस्य दुःखे तया द्वेषविषयत्वेपि भोज-
क नादाविच्छाप्रवृत्त्योः तात्विकस्य निषिद्धकर्मजन्यनरकविशेषे बलवद्द्वेषसत्त्वाच्च प्रवृत्तेः
रागांधस्य नरकगोचरद्वेषे उत्कटत्वविरहात् प्रवृत्तिः ॥ द्वेषस्योत्कटत्वं नियामकमा-
नमीचानअनुगतेर्वा ॥ दुःखत्वादिप्रकारकज्ञानस्यापि बलवद्द्वेषप्रयोजकजातीयदुःखादि
दु द्वेषस्योत्कटः कस्यचिदनुत्कटः एकस्यैव पुंसः कदाचिदुत्कटः कदाचिदनुत्कटो द्वेषः पृ॰ १५

अत एवाल्पायाससाध्यानिकादेरसेवगाहनादितो निरुद्धोपशमनादिरूपेष्टनिर्वाहसन्नि-
संधानदशापोदूरस्यस्नानसेवगाहनादिजन्यस्यैव लवदृष्टोदपानतत्रैव प्रवृत्तौ अल्पज्यो-
तिष्टोमादितोपि स्वर्गकमभवेनहूयासस्याध्यवहज्योतिष्टोमादेर्विलक्षणस्वर्गादिजनक
लेतानात्प्रवृत्तिरूपपद्यते तादृशस्वर्गादिजनकतयास्वल्पज्योतिष्टोमादावप्रतिसंधाना-
त्तादृशस्वर्गजनोवहज्योतिष्टोमाद्यनुष्ठानजन्यस्यैमादेर्बलवद्दुःखानुदयादृशावैलक्ष-
ण्यमेव फलममाप्युच्यते । तन्न कार्येकज्ञातिरूपं का चिन्तु बहुकाल[illegible] व्यापित्वं ज्योतिष्टोमा-
दिजन्यफले जातिविशेष एव कल्पते बहुकालव्यापकत्वोपगमे स्वर्गस्य सुखरूपतयैकव्य-
क्तेर्बहुकालव्यापकत्वासंभवेन सुखप्रवाहस्यैव तथात्वस्वीकरणीयतया व्यक्तिकाल्प-
नादिक्लेशेन गौरवाज्जातिविशेषकल्पनं जन्यतावच्छेदकतयाऽवश्यकमेव । अन्यथा
व्याप्यकारणत्वासंभवाद्बहुसुवर्णदानादिजन्यफले बहुकालव्यापित्वमेव फलम-
मा न तु जातिविशेषरूपमुत्कर्षः । तदा हि सुवर्णदशादित्वे वैविध्यं ने तु सुवर्णशतादि

कारणत्वे

इच्छादित्यादिरूपः॥ अतस्स्वर्णदानत्वेनैव स्वल्पबहुसुवर्णदानानामेकहेतुतेति स्व
ल्पबहुसुवर्णदानजन्यफलेषु जन्यतावच्छेदकतयाऽवान्तरवैजात्यकल्पनोपगमनाव
श्यकता एवं चाल्पसुवर्णदानादधिकादृष्टविधिबोधितफलस्यानिर्वाहाद्बहुसुवर्ण
दानगोचरप्रवृत्त्यनुपपत्त्या बहुकालव्यापकत्वमेव कल्प्यते न जातिविशेषः॥ ए
कादृष्टसुवर्णदानत्वादिरूपकारणतावच्छेदकावच्छिन्नबलात्तत्तज्जन्यतावच्छेदक
जातिविशेषावच्छिन्नानां हि आदिसुवर्णदानस्य फले प्राप्तिवारणाय पाधिकसुव
र्णदानादिघटितसामग्रीणां स्वल्पसुवर्णदानजन्यविलक्षणफलं प्रत्यनंतप्रति
बंधकताकल्पनप्रसंगात॥ यदि च वैदिककर्मजन्यस्वर्गादिरूपफलेऽनुग
तानां कालविशेषाणां सहकारिताकल्पनापत्त्या अवश्यकतया बहुसुवर्णदानज
न्यस्वर्गोत्पत्तिकालेन स्वल्पसुवर्णदानजन्यतावच्छेदकावच्छिन्नापत्तिः संभ
वितादृशकारणस्य तत्तेनाभ्युपगमात॥ वस्तुतस्तु॥ अल्पस्वर्णदानजन्यताव

छेदकजातीनां बहुसुवर्णदानजन्यतावच्छेदकजातिव्यापकत्वादुक्तस्थले द्वयापत्तिरे
वं संभवतीति मन्यते तदापि तज्ज्ञातावच्छिन्नं प्रति एकादिसुवर्णदानत्वादिनां तत्का
रणताकल्पने प्रमाणाभावात् गौरवस्य दुर्वारत्वेव॥ अस्मन्मते च स्वल्पबहुसुवर्णदानजन्य
फलानामेकजातीयतया तदवच्छिन्नं प्रति सुवर्णदानत्वेनैव हेतुताकल्पनादेवोप
पत्तेः॥ ननु सुवर्णदानानां यावत्कालव्यापकफलमेकसुवर्णादिदानानां तावत्कालव्याप
कसुखस्यैव नापत्तिः संभवः॥ अल्पकालभोगेनैवाल्पसुवर्णदानजन्यापूर्वना
शेन तावत्कालपर्यन्तं सुवर्णदानजन्यापूर्वरूपकारणानवस्थानात्॥ अल्पकाल
भोगेन च न बहुसुवर्णदानजन्यापूर्वनाशः फलाभावेन नाशकस्यासम्भवात् अकल
नात्॥ प्राथमिकसुखव्यक्तेर्भोगाद्दृष्टनाशवारणाय तत्तद्व्यक्तित्वेन चरमसुखव्य
क्तिजातिविशेषपुरस्कारेण वा फलस्यापूर्वनाशकत्वोपगमात्॥ न च बहुषु पातित्वबल
वत्त्वस्य जातिविशेषरूपतानसंभवति उत्कटानुत्कटदुःखविषयकस्य महालेवन

विधि. वा.

२१

२१

द्वेषेतरत्वं शिरस्त्वादिति वाच्यं ॥ तत्रागतत्वानां नाद्वेष्यत्वमेकोपगतत्वात् ॥ प्रयत्नयोग्यप्रद्व
द्वेषयोग्यपदस्यापि स्वीकारे दर्शितविरलत्वात् ॥ अत्रेदमवधेयं ॥ उपायेच्छाप्रतिबलवद्द्वेष
विषयतावच्छेदकरूपावच्छिन्नदुःखाजनकत्वज्ञानस्य कारणत्वे नेष्टरूपस्यापूर्वम
स्य मद्वत्तणादाविष्टप्रवृत्त्यापत्तिः ॥ बलवद्द्वेषविषयतावच्छेदकागम्यागमनादिज
न्यनरकनिष्ठजातिविशेषावच्छिन्नाजनकत्वज्ञानस्य तत्त्वं संभवात् ॥ बलवद्द्वे
षविषयतावच्छेदकं यद्रूपं तदवच्छिन्नाजनकत्वाभावकूटज्ञानस्य हेतुत्वे च ता
दृशनरकविशेषाप्रसिद्ध्यनुप[stain]स्यापि तादृशाधर्मजनकत्वावच्छेदकरूपानुपपत्तिस्ता
दृशनरकादिजनकत्वाभावस्य तत्तज्जन्मवाच्याद्यभावकूटस्य तदा दुर्ग्रहत्वात् ॥
न च यादृशयादृशदुःखे यदा यस्य द्वेषस्तादृशदुःखाजनकत्वज्ञानं तदीय
तत्कालीनोपायेच्छायां हेतुरनुपस्थितदुःखस्य तदानीं तन्न द्वेषाविषयत्वात् त
तदजनकज्ञानस्यापि रहेऽपि न क्षतिः ॥ यदा च यस्य कस्मिंश्चिदपि दुःखे न द्वेषस्त २१

दापतत्कालीनप्रवृत्तौ च बलवदनिष्टाजनकत्वज्ञानस्य हेतुतैव न कल्प्यते ॥ अतस्त्वदापतत्कालीनद्वेषा
प्रसिद्ध्यानिष्टतो रूपेण कारणत्वं न संभवतीत्यादेपानवकाश इति वाच्यं ॥ यतः ऽभवद्भिन्नद्वेषज
न्यदुःखे बलवद्द्वेषोपस्थितस्य तत्कालीनतादृशव्यक्तियापाप्रसिद्ध्या एवानुत्पत्तेः ऽप्रसिद्धेः तत्का
लीनतदीयकर्मगोचरेच्छायां तादृशदुःखाजनकत्वज्ञानहेतुत्वकल्पनासंभवात् ॥ तस्य तत्कार्य
गोचरेच्छाभावे प्रयोजकत्वं दुर्भिदत्वात् ॥ प्रसिद्धानिष्टव्यक्तिषु तत्कालीनद्वेषविषयदुः
खाजनकत्वज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुताकल्पनात् तादृशविशेषसामग्रीविरहप्र
योजक इति हास्यास्पदं ॥ एवं सति तत्तदिष्टसाधनताज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेन हेतु
तां कल्पयित्वा तादृशविशेषसामग्रीविरहस्यैव प्रयोजकतयास्तु वचनतया तादृशदुःखा
जनकत्वज्ञानस्य हेतुतायाः किंचित्करत्वात् ॥ न च विनिगमनाविरहेणेष्टसाधनता
विषयकसमूहालंबनरूपतया वा तत्कालीनतादृशदुःखाजनकत्वज्ञानस्यापि तत्त

च्छात्वेन हेतुत्वं निष्प्रत्यूहमिति वाच्यं॥ तथा सति घटादिज्ञानस्यापीच्छाविच्छेदकारणतया
तादृशदुःखाजनकत्वज्ञानस्यापि विध्यर्थताप्रसंगात् तद्ज्ञानत्वेनाहेतुत्वान्न द्विविषयकत्वा
नादपीच्छात्वं भवेतेन न तस्याविध्यर्थतेति चेत्तुल्ययुक्तेरपि॥ अथ सामान्यतस्तादृक्कर्मप्र
कारकबलवद्द्वेषकालीनेच्छायां तत्तत्कर्मावच्छिन्नाजनकत्वज्ञानत्वेनैव हेतुता तत्तत्क
र्मप्रकारकबलवद्द्वेषविरहकालीनेच्छायां प्रवृत्तौ च तादृशद्वेषाभावो हेतुः। अथ मदीय
हारागादिजन्यदुःखे यद्बलवद्द्वेषस्तदा तादृशदुःखविशेषाजनकत्वज्ञानविरहे
ण च तादृशदुःखविशेषबलवत्प्रकारकबलवद्द्वेषकालीनेच्छासामग्र्यास्तादृशबलवद्द्वेष
सत्त्वेन च तद्विरहकालीनेच्छासामग्र्या अभावान्न तादृशकर्मणीच्छासामान्यापत्तिः॥
विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः फलजनकत्वात्॥ बलवद्द्वेषविरह २२
कालीनप्रवृत्तौ सामान्यतो बलवद्द्वेषविरहस्य हेतुत्वे भक्ष्यभक्षणजन्यदुःखविशेषेव

लवद्द्वेषदशायामगम्यागमनादिजन्यदुःखविशेषवत्वाप्यवच्छिन्नजनकत्वज्ञानघटितसा
मग्रीविरहादभक्ष्यभक्षणादिविषयापत्तेः॥ अगम्यागमनादिजन्यदुःखविशेषे बल
वद्द्वेषदशायामभक्ष्यभक्षणजन्यदुःखे बलवद्द्वेषासत्वे तादृशज्ञानेन फलजनना
त्स्पलीयसामग्र्याः बलवद्द्वेषसामान्याभावेनाभक्ष्यभक्षणजन्यदुःखविशेषाजन
नतज्ज्ञानेन वा घटितायास्तादृशीमपि सत्त्वात् । अतस्तत्र धर्मप्रकारकबलवद्द्वेषावि
रहकालीनेष्टसाधनताज्ञाने बलवद्द्वेषाभावत्वेन हेतुतानुसरणं॥ तथा च दर्शितस्थली
यामभक्ष्यभक्षणेष्टसामग्र्यामदृष्टाधीनदुःखविशेषत्वप्रकारकद्वेषाभावघटिततया
प्रकृते तदभावेनापत्तिविरहादिति वदतां मिश्राणां नीवत्नीनीति॥ केचित्तु प्रवधी
यते॥ न हि यद्यत्तज्जन्यफले बलवद्द्वेषस्तदभाववति हेतोत्तरक्षण एव तदुपायेच्छा
नुत्पत्तिस्तेषामसतिप्रयोग्यप्राक्कविशेषगुणप्रोर्युगपदनुत्पादात्तत्कालेच्छा तत्साधन
ताज्ञानाधिकरणक्षणोत्पद्यमानेच्छाद्वेषावाधिस्थितसंभवेन द्वेषक्षणफलेच्छा तत्साधनताज्ञा

विधि·वा

नघटितसामग्रीविरहेत्येवतदव्यवहितोत्तरक्षणेउपायेच्छानुत्पादसंभवे बलवद्द्वेषविषय
दुःखसाधनत्वाज्ञानहेतुत्ववत्वेनापानिष्टेत्कित्वापत्तादितिद्वेषोत्तरं हि त्रिक्षणमध्ये
२३ इष्टसाधनत्वप्रतिसंधानस्यावश्यमनुमंतव्यं॥ एवं च प्रवृत्तिहेतुभावनाकारणतया कल्पितदुपप
त्तेः॥ अथेच्छापाज्ञानस्य चोत्पत्तिकाले द्वेषोत्पत्तेरनभ्युपगमे द्वेषकालीनजीवनयो
23 नियतेरेवमत्वाधिकरणे द्वेषसमवायित्वसंबंधेनप्रतिबंधकत्वस्याधिकरणे त
त्कालिकविशेषणतयाबोध्यं॥ द्वेषोत्पत्त्यनंतरक्षणे त्रयमध्ये एवोपायेच्छोत्पत्ति
नोपपत्ते॥ वस्तुतोज्ञानयोरेवयुगपदुत्पादानभ्युपगमेनज्ञानस्येच्छायाश्चोत्पा ता
दक्षणे द्वेषोत्पत्त्या द्वेषनाशानंतरक्षणे उपायेच्छोत्पत्तावपि बलवद्द्वेषविषयदुः
खाजनकत्वज्ञानमावश्यकमेवेति चेद्द्वेवमपि तत्तदुक्तप्रकारकबलवद्द्वेषस्याह
ततत्तद्धर्मावच्छिन्नजनकताज्ञानमेवोपायेच्छासामान्यप्रतिबंधकमस्तु॥ ताद २३
शकार्यकारणभावद्वयकल्पनापेक्षयैकशोकप्रतिबंधकाभावहेतुत्वे लाघवात्

ष्टविशिष्टस्य तादृशज्ञानस्य तादृशज्ञानविशिष्टस्य हेत्वस्य वा प्रतिबन्धकत्वे विनिगमनावि
रहः । न च किंचित्करः मैवं तत्तद्धर्मप्रकारकत्वेन हेत्वव्यवहितोत्तरत्वादेरनुगमवि
रहेतुः स्वाजनकत्वपदं ज्ञानजन्यतावच्छेदकशरीरे निवेशनीयतया महागौरवात्॥ अन्नु वा
तत्तद्धर्मप्रकारकहेत्वानुत्तरेच्छायामप्रतितादृशहेत्वभावः स्वप्रकारकेण॥ हेत्वोत्तरेच्छायां तु तत्त
द्धर्मावच्छिन्नाजनकत्वज्ञानस्यालीपतज्जनकत्वज्ञानाभाव एव हेतुः जनकत्वाभावज्ञान
स्येष्टकारतावच्छेदकजनकत्वप्रकारतानिरूपितभावत्वावच्छिन्नप्रकारताकत्वापेक्ष
या जनकत्वज्ञानाभावनिष्ठहेतुतावच्छेदकस्य जनकत्वप्रकारकज्ञानाभावत्वस्य लघु
त्वात्॥ अथ यानिष्टजनकत्वसंदेहेऽपीष्टप्रवृत्त्यनुदयात्सामान्येनानिष्टसाधनताकांदितत्व
विशिष्टस्य संशयसाधारणज्ञानस्य प्रतिबन्धकत्वं वाच्यं तदपेक्षया सामान्येन ज्ञाना
नास्कंदितं तदजनकत्वनिश्चयत्वेन हेतुत्वे लाघवमिति चेत्। मरणादिजनकत्वसंदेहेऽपि

युक्तदाविशेषप्रवृत्तिहेतोर्नाहं प्रामाण्यनिश्चयानास्कंदिततद्ग्रजनकत्वज्ञानत्वेनैव हेतुतायां वक्त
व्यत्वात् प्रामाण्यज्ञानानास्कंदिततज्जनकत्वनिश्चयत्वेनैव प्रतिबंधकतायां वक्तव्यतया
विपरीतगौरवात्। एवमिष्टसाधनत्वज्ञानकालेऽप्रामाण्यशंकानंतरज्ञानोत्पत्तिकल्पनेगौरवादिष्टसा
धनताज्ञानप्रतिबंधकत्वमावश्यकं तस्मात् सर्वमवगमयते तत्तत्कालीनहेतुविषयतावच्छे
दकीभूततापेक्षधर्मावच्छिन्नाजनकत्वज्ञानतत्कालीने[illegible]ष्टसाधनताज्ञानत्वेन
प्रतिबंधकत्वे कालभेदेनानंतप्रतिबंधकतासंगात्स्वामानंतर्ह्येतुविषयतावच्छे
दकीभूततापावंतसूत्रस्वावच्छिन्नाजनकत्वज्ञानविशिष्टेष्टसाधनताज्ञानत्वेन तथात्व
पुनरपेक्षकल्पनंतादृशजनकत्वाभावकूटज्ञानस्यैकदासत्त्वात्॥ यत्किंचि[illegible]त्तद्व
च्छिन्नाजनकत्वज्ञानविशिष्टत्वानिवेशेतदानीतनहेतुविषयतावच्छेदककतिपय
धर्मावच्छिन्नाजनकत्वज्ञानाभाव[illegible]दशायामपितथाविधयावत्त्विच्छुर्मावच्छिन्ना

जनकत्वज्ञानविशिष्टेष्टसाधनताज्ञानस्यापितत्रज्ञानोत्पत्तिविरोधितासंगाहत
त्तत्तद्धर्मप्रकारकहेतुविशिष्टानांतत्तद्धर्मावच्छिन्नजनकत्वज्ञानाभावानांकूट
वैशिष्ट्यमेवनिवेशनीयंतत्कालीनहेतुविषयतावच्छेदकीभूततत्तद्धर्मस्यावच्छि
न्नजनकत्वज्ञानसत्त्वेऽनुपस्थिततद्धेतुनिष्ठधर्मावच्छिन्नजनकत्वज्ञानासत्त्वेपि
तादृशधर्मप्रकारकहेतुरूपविषयाणामभावात्तद्विशिष्टज्ञानाभावानामभावः कूल
भाद्वा॥ अस्मन्मते च तद्धर्मप्रकारकहेतुविशिष्टतत्तद्धर्मावच्छिन्नजनकत्वज्ञाना
भावकूटनिवेशाल्लाघवं तस्मादुक्तलक्षणेष्टानुबन्धित्वज्ञानेप्रतिबन्धकेनतु त
दनुबन्धित्वज्ञानं कारणं॥ वस्तुतस्तु॥ उपायगोचरहेतुवाएवकार्यसहभावेनप्र
तिबन्धकः लाघवात् सचतादृशहेतुविषयसाधनताज्ञानानंतरक्षणे ज्ञायत
इति न तदानीमुपायेच्छापत्तिः॥ केचित्तु॥ फलीभूतदुःखगोचरत्वं हेतुवन्ना
शानंतरमुपायेच्छां स्वीकुर्वतोपायापात्मविशेषगुणयौगपद्याभावमात्रंलव्यव मा

विधि॰वा॰
२५
25

लवदनिष्टाननुबंधित्वज्ञानहेतुतां खंडयंति न स्वीकुर्वंति चेद्द्वेषादिप्रतिबंधकतां
तेषां बलवदनिष्टसाधनताज्ञानस्य विषभक्षणादिगोचरप्रवृत्त्यनुत्पादप्रयोज
कत्वविरहेऽत्यविषभक्षणादौ मरणादिसाधनताज्ञानवतां कुतस्तत्र प्रवृत्तिवा
रणाय प्रामाणिकप्रयुक्तस्य विषं न भुंजीतेत्यादिनिषेधवाक्यस्य बलवदनि
ष्टसाधनत्वपरस्य प्रयोजकता दुरुपपादेवं "वेदवित्तु" बलवदनिष्टसाधनता
ज्ञानकालीनफलेच्छाव्यावृत्तजातिविशेषवानेव फलेच्छायां कारणतावच्छेद
कतया कल्पयंति "बलवदनिष्टसाधनतद्साधनत्वफलगोचरसमूहा
लंबनेच्छास्य फलेच्छात्वे मेदमनुमन्यंते" "मिश्रास्तु" बलवदनिष्टाननुबंधित्व
साधनाभावस्यैव कारणत्वं युक्तमित्याहुः क्व बलवदनिष्टाननुबंधित्वज्ञा
नस्याहेतुत्वे दुःखसाधनत्वज्ञानसाध्यत्वयोरेव विध्यर्थतया तदभावस्य क
लोज महत्वणादौ बाधेन नञ्कलंजं भक्षयेदित्यादिनिषेधवाक्यानामप्रमा २५

णमापाद्यमणिकाराभिमतं तदनुबंधित्वज्ञानकारणत्वे व्यवस्थापयंति कलंजभक्ष
णान्वितनञर्थाभावेनान्वितस्यापि प्रत्यवायपरिहाररूपफलनिरूपितत्वेन साध्या
रण साधनत्वस्यान्वयप्रकृत्यर्थान्वितस्वार्थबोधकत्वे प्रत्ययानामिति व्युत्पत्ति
विरोधमंतर्भाव्य निराकुर्वंति ॥ कलंजेत्यालोचनीयं ॥ मामकं तु बलवदनिष्टाननुबंधि
त्वस्य ज्ञानं कारणं तथापि तस्य विध्यर्थतायां निराबाधकतासंभवः प्रतिबंधकी
भूततदननुबंधित्वज्ञानविघटनेन प्रवृत्तिप्रयोजकस्य तद्वदिष्टजनकज्ञानस्य जन
कत्वानुरोधेन तस्य विध्यर्थत्वमावश्यकमिति तदभावस्य नञा बोधनान्नेति
षेधविधेरप्रामाण्यं हेवं कलंजभक्षणान्वितनञभावेनान्वितस्येष्टसाधनत्व
स्य विध्यर्थत्वेपि विधिं प्रति परप्रत्ययार्थकृत्यर्थान्वितस्यापि बोधकत्वनिर्वाहेण
न व्युत्पत्तिविरोधाभावात् ॥ कलंजभक्षणाभावेष्टसाधनबोधस्योपपत्तौ मेपि
५

१सम

विधिवि॰
२६
26

नद्येति ॥ साक्षात्प्रकृत्यर्थान्वयित्वस्य तादृशव्युत्पत्तावंतर्भावे मिश्रमतेपि वलवद्
निष्ठानन्वयित्वविशिष्टेष्टसाधनत्वस्य विधेयतया तस्य नञर्थ एव प्रतियोगि
तयाऽन्वयात्साक्षात्तस्य नञि द्यपि विधेयस्य प्रकृत्यर्थान्वयाभावे उक्तव्युत्पत्तिवि
रोधापरिहारात् ॥ अथ विशिष्टेष्टसाधनत्वस्य नञ्यपि भावोन्वयेपि इति साध्य
त्वरूपस्यैव विधेयस्य साक्षात्प्रकृत्यर्थेऽनन्वयान्नतन्मते व्युत्पत्तिविरोध
इति चेद् वैकल्पस्यान्मतेपि तादृशविधेयस्य साक्षात्प्रकृत्यर्थेऽन्वयान्न व्यु
न त्पत्तिविरोधः प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य तादृशव्युत्पत्तावंतर्भावे
तन्मतेप्यगतिरेव ॥ अथ निषेधरूपाग्रमैव व्युत्पत्तिः ॥ तस्याश्च धात्वर्थे
इति साध्यतान्वयान्मिश्रमतेऽविरोधः भवतां धात्वर्थे इति साध्यत्वान्वये. २६
इति साध्यकलंजभक्षणत्वावच्छिन्नाभाव एव नञा बोधनीयो ननु शुद्धकलं

जमद्गण्यत्वावच्छिन्नाभावः । अभाववोधे प्रतियोगिप्रकारीभूतधर्मे प्रतियोगितावच्छेदकत्वमा
न नियमेन वृत्तिसाध्यत्वस्योपलक्षणतया मदग्न्येत्वप्यसंभवात् एवं च तादृशाभावे प
त्वस्याप्यपरिहारः साधनतायां बाध एव वक्तृतिसाध्यत्वेनाविशेषितस्यैव कलंजभक्षण
त्वस्य प्रत्यवायजनकतावच्छेदकतया तद्विशिष्टकलंजभक्षणत्वावच्छिन्नाभावस्य
कारणतावच्छेदकावच्छिन्नाभावानात्मकतया प्रत्यवायकत्वकार्याभावाप्रयोज
कत्वात् ॥ नहि नीलत्वादिविशिष्टदण्डत्वावच्छिन्नाभावो घटाद्यभावप्रयोजकतया
केनापीष्यते कृतिसाध्यत्वान्वितकलंजभक्षणस्येव बलवदनिष्टाननुबन्धित्वविशिष्ट
इष्टसाधनत्वाभावान्वयेपि न किंचिद्विरोधः ॥ कृतिसाध्यत्वस्यानिष्टजनकतावच्छेदका
घटकत्वेपि तद्विशिष्टाभावबोधात् ॥ यदि च विशिष्टवाच्याभावस्यानुयोगितावच्छेद
कमेव विशिष्टाभावस्यानुयोगितावच्छेदकं ॥ एवं च बलवदनिष्टाजनकत्वरूप

हृतिसाध्यत्वविशिष्टे तादृशविशिष्टाभाववैशिष्ट्यबोधो न संभवतीति मन्तेत हानु २

विधि·वा· विशेषणाभावस्य कृतिसाध्यत्वघटितधर्मानुयोगितावच्छेदकः ज्ञानकतायाम
वच्छेदकस्यैव तदनुयोगितायामप्यवच्छेदकत्वादिति तादृशधर्मावच्छिन्नविशिष्ट
भावस्यापि तथात्वं वक्तुमर्हतीति कृतिसाध्यत्वतादृशविशिष्टाभावानामेकत्रैकदु
२८ पस्थितिरीत्यैव कलञ्जभक्षणेऽन्वयप्रबोधः अत्र च न काचिदनुपपत्तिः॥ एवं च
27 बलवदनिष्टाननुबन्धित्वस्याभावत्वमादाय विनिगमनाविरहस्य दुरूपहृवत
यापृथगेव तयोः शक्तिरिति मतेऽपि बलवदनिष्टाननुबन्धित्वाभावस्य तादृशा
निष्टजनकत्वरूपस्य कृतिसाध्यत्वेष्टसाधनत्वोभयविशिष्टे तदेकदेशविशि
ष्टे वा कलञ्जभक्षणे नान्वयः तेन तादृशधर्मयोः प्रत्यवायजनकतावच्छेदककु
रूपानिविष्टतया बाधकाभावेऽपि तत्किंत्वेकत्र रूपस्थितिरीत्यैवेतदन्वयउपपत्ते
विशिष्टानुयोगिकवैशिष्ट्यबोधतात्पर्ये ... अत्रागत्या तत्साम २७

विशिष्टेष्टसाधनत्वे विधिशक्त्युपगमे इष्टसाधनत्वविशिष्टस्य बलवदनिष्टाननुबन्धित्वे

त्यागः वाजपेयेन यजेतेत्यादौ प्रकारान्तरासंभवात् वाजपेयसाध्यत्वेष्टसाधनत्वयोः केवलमेव ज
ह्वप्रमितिरीत्या यागेऽन्वयबोधः स्वीक्रियते मा भूद्वृत्तिसाध्यत्वस्य तन्मते धात्वर्थेऽन्वयः त
थापि नञर्थान्वितधात्वर्थभेदे आख्यातसामान्यापेवृत्तौ विशेषणतयाऽन्वयात्तादृशावृत्
त्तेरपरित्यागः इति चेन्नहि प्रत्ययानां साक्षात्प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्य सामा
न्यीकृत्वेन यापि कृतिसाध्यत्वाविषयकत्वे कलञ्जभक्षणकृत्यभाव इष्टसाधनमित्याकारक
एव बोध उपगंतव्यः ॥ एवं च बलवदनिष्टासाधनताया विध्यर्थत्वे यागपाकादिजन्यतोतदी
यनञ्समस्यापि गृहाचित्केस्य बलवद्द्वेषविषयतया बलवद्द्वेषविषयदुःखाजनकस
यागपाकादौ बाधात् ॥ पचेतेत्यादिविधेरसामर्थ्यप्रसंगः यदा यस्य पाकादिगोचरस्य बलवद्वि
ष्टीयते तत्कालीनतत्कर्तृकपाकीयबलवद्द्वेषाविषयासाधनतस्य न विध्यर्थतासंभवः अत नंतु
गमात् ॥ यत्र कलञ्जभक्षणादेः प्रमातरागेण कृत्वेन प्रवर्तते कलञ्जभक्षणादेरपि तत्कालीन
तत्कर्तृकबलवद्द्वेषविषयासाधनत्वात्तदभावबोधकस्य न कलञ्जभक्षयेदित्यादिनिषेध

विधेरसामान्यप्रसंगाज्जेतान्युपपत्तिरपि समाहिता बलवदनिष्टाननुबंधित्वस्य विध्यर्थतया
एवानुपगमात् ॥ अस्तु वा पापाजनकत्वमेव वैदिकविध्यर्थः श्येनादौ च निषेधस्थले
नञ्जा बोध्यते तेन च नरकजनकत्वमभावाद्धिंसायां पापजनकत्वाभावे तत्कलंजभक्ष
णकृतिमात्रं जनकत्वान्वयबोधः प्रत्ययार्थविशेष्यकः ॥ एतेन बलवदनिष्टा
ननुबंधित्वस्य विध्यर्थतानुपगमे अग्नीषोमीयं पशुमालभेतेत्यादिविधिर्यथा
धर्मपेन मा हिंस्यात्सर्वभूतानीत्यादिनिषेधविधेर्वैधेतरहिंसापरत्वेनान्यपरत इति सि
द्धे तद्विरोधः वैधहिंसा पापानरकजनकत्वेपि अग्नीषोमीये तान्पश्वालभेनाहो विध
यत्र कृतिसाध्यत्वस्येष्टसाधनत्वस्याबाधादित्यपि समाहितं ॥ पापाजनकत्वरूपविध्यर्थे वा
